| | | | |
|---|---|---|---|
| **SRI BHAGAWAN MAHAVEER JAIN COLLEGE**<br>Vishweshwarapuram, Bangalore. | | **Course:** | II PUC |
| | | **Subject:** | Sanskrit |
| **Mock Exam-2 Feb.2016** | | **Max. Marks:** | 100 |
| | | **Duration:** | 3:00Hrs. |

**। एकवाक्येन संस्कृत भाषया उत्तरं लिखत ।** **1 x 10 = 10**

१. कुत्र सप्त कुलपर्वताः सन्ति?

२. चिरञ्जीवि कस्य नाम?

३. परिव्राजकस्य अवस्थां दृष्ट्वा कः जहास?

४. मूर्तिमती सत्क्रिया का?

५. राणाप्रतापः कस्मिन् ग्रामे अजायत?

६. हंसस्य सुता का?

७. का मौनं विभज्य अवोचत्?

८. भार्गवास्त्रम् कः उपदिशति?

९. अर्थान् कथं चिन्तयेत्?

१०. कृष्णशास्त्रिणां अध्यापकः कः?

**॥ द्वित्रैः वाक्यैः संस्कृत भाषया, कन्नड्भाषया आङ्गलभाषया वा उत्तरं लिखत– (पञ्चनामेव)** **5 x 2 = 10**

११. भारतवर्षस्य प्रसिद्धपञ्चनदीनां नामानि लिखत ।

१२. सिंहासनद्वात्रिंशिका ।

१३. प्रव्राजकः निजान् अनुचरान् किम् उवाच?

१४. बिल्लाः राणाप्रतापं कथं साहाय्यम् अकुर्वन्?

१५. प्रणामावसरे महाश्वेता कीदृशी आसीत्?

१६. शान्त्याः सौन्दर्यं वर्णयत?

१७. चाणक्यः।

**III पाठनाम विलिख्य श्लोकानाम् अनुवादं कन्नड्–आङ्गलभाषायां वा कुरुत (त्रयाणामेव) ।** **3 x 3 = 9**

१८. तत्फलं भुज्यते चैव भोगभूमिष्वनुक्रमात् ।
भारते तु कृतं कर्म शुभं वाशुभमेव च ॥

१९. त्यक्त्वात्मसुखदुःखेच्छां सर्वसत्त्वसुखैषिणः ।
भवन्ति परदुःखेन साधवोऽत्यन्तदुःखिनः ॥

२०. ततश्च तस्या निर्गत्य वानरो भीषणाकृतिः ।
तमभ्यधावत् स्वकृतो मूर्तिमानिव दुर्नयः ॥

२१. तदेषा भवतः कान्ता त्यज वैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥

२२. धनहीनो न हीनश्च धनिकः स सुनिश्चयः ।
विद्यारत्नेन यो हीनः स हीनः सर्ववस्तुषु ॥

**IV). पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृत भाषया लिखत– (चतुर्णामेव) । 4 x 2= 8**

२३. मया परार्थमेतत् शरीरं दीयते स्वेच्छया ।

२४. अङ्गुलीयकशून्या मेऽङ्गुलिः ।

२५. सुखानि ते भर्तृकुलदेवताः वितरन्तु ।

२६. मम जीवनं सार्थकं भवेत् ।

२७ किं माम् अन्यथा सम्भावयसि ।

२८. अहो! गुरुकुलवैभवम् ।

**V). दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्गलभाषया वा उत्तरं लिखत– (पञ्चानामेव) । 5 x 5 =25**

२९. भारतवर्षस्य भौगोलिकचित्रणं कुरुत ।

३०. शून्या मेऽङ्गुलिः इति शीर्षिकां समर्थयत ।

३१. दुष्यन्तस्य पात्रचित्रणं कुरुत ।

३२. कीदृशं मुनिकुमारकम् अपश्यम् इति महाश्वेता वर्णयति ?

३३. पुण्डरीक–महाश्वेतयोः सरससंवादः ।

३४. परशुरामः कर्णं किमर्थं शपति ?

३५. कृष्णशास्त्रिणां बाल्यम तथा संस्कृत भाषाप्रेम ।

**VI). मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत–। 4 x 1 = 4**

३६. उत्तरं यत् समुद्रस्य___________ दक्षिणं च यत् ।

३७. वत्स_________ उन्मील्याद्य पश्य ।

३८. राणाप्रतापः ________ सभाम् आकारितवान् ।

३९. ________ ददाति चेत् सन्ततिच्छेदो भविष्यति ।

| |
|---|
| पुत्रं, गण्यानाम्, हिमवत्, चक्षुषी |

**VII संयोजयत– । 4 x 1 = 4**

४०.

| | |
|---|---|
| विषयः | राणाहमीरः |
| विलासमिव | वायुः |
| सिसीदिया | प्रेरयतीन्द्रियम् |
| गन्धवहः | सरस्वत्याः |

**VIII रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत–(त्रयाणमेव) । 3 x 1 = 3**

४१. द्वीपेषु सर्वेषु <u>नराः</u> प्रयान्ति ।

४२. <u>चिन्तातुराणां</u> न सुखं न निद्रा ।

४३. अनुचराः <u>प्रवाजकस्य</u> वचनम् अपालयत् ।

४४. शान्तिः <u>धनं</u> न स्वीचकार ।

४५. <u>विमर्शकेन</u> कृतीनामध्ययनं सम्यक् कर्तव्यम् ।

**IX यथा निर्देशं कुरुत– (चतुर्णामेव) । 4 x 3 = 12**

४६. **सन्धिं विभजत–योजयत (त्रयाणामेव)**

भरणाच्च, बालः+एव , एतन्नयेत, पशवो+अपि, ततः+ततः

४७. **विग्रहवाक्यं/समस्तपदं लिखत– (त्रयाणामेव)**

नराधमः, मुनिकुमारकम्, कामक्रोधौ, हस्तात्–च्युतान्, मतिम् अनतिक्रम्य

४८. **लिङ्–विभक्ति–वचनानि लिखत (त्रयाणामेव)**

पौरवैः, कौतुकात्, प्रजानाम्, मह्यम्

४९. **लकार–पुरुष, वचनानि लिखत (त्रयाणामेव).**

श्रृणु, त्यजति, चिन्तयत, अपठिष्यम्, भाषेत

५०. **पदपरिचयं कुरुत (त्रयाणामेव)**

विज्ञाय, स्मृतम्, त्यक्त्वा, प्रवेशयितुम्, अन्यथा

५१. **प्रयोगं परिवर्तयत–**

वत्सः मातरं गच्छति ।

अथवा

निवार्यतां हृदयम् ।

५२. **सलक्षणम् अलङ्कारं निर्दिशत–**

मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ।

अथवा

तमभ्यधावत्–स्वकृतो मूर्तिमानिव दुर्नयः ।

**X ५३. संस्कृतभाषया अनुवदत । 5 x 1 = 5**

ಒಮ್ಮೆ ವಿಶ್ವಾಮಿತ್ರ ಮಹರ್ಷಿಗಳು ದಶರಥ ಮಹಾರಾಜನ ಆಸ್ಥಾನಕ್ಕೆ ಬಂದರು. ಯಜ್ಞರಕ್ಷಣೆಗಾಗಿ ಬಾಲಕರಾದ ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ತಮ್ಮ ಜೊತೆ ಕಳುಹಿಸುವಂತೆ ಕೇಳಿಕೊಂಡರು. ಪುತ್ರವಾತ್ಸಲ್ಯದಿಂದ ದಶರಥನು ದುಃಖಿತನಾದನು. ಕುಲಪುರೋಹಿತರಾದ ವಸಿಷ್ಠರು ವಿಶ್ವಾಮಿತ್ರರ ಬೇಡಿಕೆಯನ್ನು ಪೂರೈಸುವಂತೆ ದಶರಥನಿಗೆ ನುಡಿದರು. ಲೋಕಕಲ್ಯಾಣಕ್ಕಾಗಿ ದಶರಥನು ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ಕಳುಹಿಸಿದನು.

Once the sage Vishwamitra came to the court of the king Dasharatha. He requested to send the boys Rama and Lakshmana to protect his sacrifice. Dasharatha felt sad due to affection towards his children. Vasishtha, the preceptor of the family, advised Dasharatha to fulfil Vishwamitra's request. Dasharatha sent Rama and Lakshmana for the welfare of the world.

**५४. कन्नड्भाषया–आङ्ग्लभाषया वा अनुवदतः 5 x 1 = 5**

क्रीडा मानवस्य नितराम् आवश्यकी । क्रीडया शक्तिः वर्धते । उल्लासः उत्पद्यते । आरोग्यं जायते । मनः विकसति । जीवनोत्सहः एधते । एकताभावः सम्पद्यते । मैत्री विस्तारं गच्छति, अतः खलु ज्येष्ठाः एकघण्टापर्यन्तं तुल्यशीलवयोभिः क्रीडितव्यमिति उपदिशन्ति ।

**XI इमं परिच्छेदं पठित्वा प्रशनामुत्तराणि लिखत । 1 x 5 = 5**

एकदा सगरो नाम राजा आसीत् । सः अश्वमेधयागं कर्तुम् विचिन्त्य यज्ञाश्वं प्रेषितवान् । इन्द्रः एतत् मत्वा सगरस्य यज्ञाश्वम् अपहृत्य रहसि पाताललोकम् नीत्वा कपिलमहर्षेः पृष्ठतः स्थापितवान् । सगरस्य पुत्राः यज्ञाश्वम् अन्विष्यन्तः कुत्रापि अश्वम् अपश्यन्तः भूमिं खनित्वा पातालं गतवन्तः। तत्र कपिलमहर्षेः पृष्ठतः तृणानि खादन्तं यज्ञाश्वं दृष्टवन्तः । कपिलमहर्षिः एव यज्ञाश्वम् अपहृतवान् इति मत्वा तम् अपीडयन् । कपिल महर्षिः कोपात् उग्रदृष्ट्या तान् अपश्यत् । सगरपुत्राः भस्मीभूताः अभवन् ।

i) सगरः किं कर्तुम् अचिन्तयत्?

ii इन्द्रः यज्ञाश्वं कुत्र स्थापितवान् ?

iii) सगरपुत्राः कुत्र गतवन्तः ?

iv) सगरपुत्राः महर्षिं किमर्थं अपीडयन्?

v) महर्षिः तान् कथं अपश्यत्?

******